

संस्कृत भारती

अक्षरम्, ८ उपमार्गः, २ घट्टः गिरिनगरम्, बेङ्गलूरु - ५६० ०८५.

पत्रालयद्वारा संस्कृतम्

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

SHIKSHA -8

Bk. Demian 2000

ॐ

॥ जयतु भारतम् - जयतु भारती ॥

संस्कृत भारती

पत्रालयद्वारा संस्कृतम्

Samskrit Through Correspondence

"Aksharam" 8th Cross, II Phase, Girinagar,
Bangalore-560 085. Ph.: 6721052

Serial No. [   ]

शिक्षा

॥ वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ॥

Good conduct makes one noble, neither wealth nor learning does.

अष्टमः पाठः

१. कृदन्ताः (Participles)

अ) Read the following sentences-

१. सूर्ये अस्तं गते (सति) वयं गृहं प्रत्यागताः ।
When sun set, we returned home.

२. शिक्षके आगते (सति) छात्राः तूष्णीम् अभवन् ।
As soon as the teacher came, students became silent.

३. श्रीरामे वनं गते (सति) दशरथः प्राणान् अत्यजत् ।
When Rama went to forest, Dasharatha died.

४. कौसल्यायाम् आगतायां (सत्यां) सीता उत्थितवती ।
As Kausalya came Sita got up.

Similarly make out the meaning of these sentences -

५. त्वयि आगते (सति) अहं गृहे न आसम् ।

६. घण्टायां वादितायां[1] (सत्यां) सर्वे छात्राः गतवन्तः ।

७. समये प्राप्ते[2] (सति) भवतः गृहम् अवश्यम्[3] आगमिष्यामि ।

८. वसन्तकाले [4]सम्प्राप्ते (सति) कोकिलः कूजति[5] ।

९. पुत्रेषु परीक्षायाम् उत्तीर्णेषु (सत्सु) माता सन्तुष्टा ।

१०. जनेषु कोलाहलं कुर्वत्सु[6] (सत्सु) चोरः पलायितवान् ।

११. नारीषु जल्पन्तीषु[7] (सतीषु) अन्धकारः प्रसृतः[8] ।

१२. कपिषु पश्यत्सु (सत्सु) हनूमान् समुद्रलङ्घनं कृतवान् ।

१३. गायिकासु गायन्तीषु[9] (सतीषु) श्रोतारः[10] सन्तोषम् अनुभूतवन्तः ।

१४. अस्मासु आगतेषु[11] (सत्सु) किमर्थं भवन्तः तूष्णीं स्थितवन्तः ?

१५. धनिकेन धने दीयमाने[12] (सति) भिक्षुकाः आगताः ।

१६. सर्वेषु शयानेषु[13] (सत्सु) चोरः गृहं प्रविष्टवान् ।

१७. भक्तैः ध्याने क्रियमाणे[14] (सति) वार्तालापं मा कुरु ।

१८. राहुणा चन्द्रे ग्रस्यमाने[15] (सति) भोजनं न करणीयम् ।

सति-सप्तमी

All the above sentences are in सतिसप्तमी form. This formation of sentence is also called सत्सप्तमी or भावलक्षणसप्तमी. To know this in detail please observe these three sentences -

---

1. Rang, 2. got, 3. surely, 4. come, 5. cooes, 6. Doing, 7 Chattering, 8. Spread, 9. Singing, 10. Audience, 11. Came, 12. Given, 13. Slept, 14. Doing, 15. Swallowed

१. गोषु दुह्यमानासु सः गतः = He went while cows are (were) being milked.

२. गोषु दुग्धासु सः गतः = He went when the cows were milked.

३. गोषु धोक्ष्यमाणासु सः गतः = He went when the cows were to be milked.

There are two actions in all these three sentences. One is दोहन (milking) and another is गमन (going). The first action (milking) indicates the time when the second action (going) took place. Let us call the first action indicative and second action as indicated. Please note that the indicative action is expressed in वर्तमान, भूत, भविष्यत् कृदन्त forms respectively. You already know that these कृदन्त forms are adjectives and they follow the nouns. Here the noun is cow. Both words are used in सप्तमीविभक्ति, with these two words, another word सत् (in सप्तमीविभक्ति) is used or to be understood. This word also follows the noun in gender number and case.

The forms of the word सत् (in सप्तमीविभक्ति) are like this.

एक.	द्वि.	बहु.
सति	सतोः	सत्सु (पु. न)
सत्यां	सत्योः	सतीषु (स्त्री)

उदा- रामे वदति सति.... (while Rama was talking)

रामलक्ष्मणयोः वदतोः सतोः.....

रामलक्ष्मणभरतेषु वदत्सु सत्सु......

सीतायां वदन्त्यां सत्यां ....

सीताकौसल्ययोः वदन्त्योः सत्योः ....

सीताकौसल्यासुमित्रासु वदन्तीषु सतीषु ....

आ) Read the following story and note the participle forms taught in the previous lessons.

१) कश्चित् यतिवरः उटजे[1] आसीत् ।

२) स काश्चन ताम्रकणिकाः[2] सङ्गृह्य एकस्मिन् कुम्भे स्थापितवान् ।

३) यतिवरः शिष्यान् आहूय[3] उक्तवान् ।

४) 'इमाः ताम्रकणिकाः दरिद्रेभ्यः दीयन्ते इति सर्वत्र गत्वा प्रचारं कृत्वा आगच्छन्तु' इति ।

५) शिष्याः तस्य वचनं श्रुत्वा सर्वत्र गत्वा प्रचारं कृत्वा आगतवन्तः ।

६) बहवः दरिद्राः आगत्य यतिवरं नमस्कृत्य पृष्टवन्तः ।

७) 'अहं दरिद्रः, मह्यं ताम्रकणिकाः दत्त्वा दारिद्र्यं दूरीकरोतु[4]' इति ।

८) किन्तु यतिवरः तान् दृष्ट्वा वचनं च श्रुत्वापि ताम्रकणिकाः न दत्तवान् ।

९) कदाचित् नृपः अश्वम् आरुह्य[5] गच्छन् उटजसमीपे अवतीर्य यतिवरं दृष्ट्वा नमस्कृतवान् ।

१०) तदा यतिवरः नृपम् अवलोक्य कुम्भात् ताम्रकणिकाः आदाय नृपाय दत्तवान् ।

११) तत् दृष्ट्वा आश्चर्येण युक्तो भूत्वा नृपः प्रश्नं कृतवान् ।

१२) 'यतिवर ! अहं न दरिद्रः । किमर्थं मह्यं ताम्रकणिकाः दत्ताः ?' इति ।

१३) यतिवरः उत्तरितवान्[6] ।

1. in a hut, 2. Copper coins, 3. having called, 4. drive away 5. having climbed, 6. replied

१४) "राजन् ! रणाङ्गणे शत्रून् निहत्य[7] पराक्रमः प्रदर्शनीयः । शत्रुराज्यम् आक्रम्य धनम् अपहृत्य स्वकोषः[8] पूरणीयः इति भवतः आशा विशाला अस्ति ।

१५) अतः नृपः भूत्वापि भवानेव दरिद्रः ।"

१६) यतिवरस्य वचनम् आकर्ण्य[9] राजा इदं सुभाषितं स्मृतवान्- "स तु भवति दरिद्रो यस्य तृष्णा विशाला" इति ।

२. पदसङ्ग्रहः

मन् - to think, to conceive (an idea)

१. मन्यते, २. मन्यते, ३. मंस्यते,

४. मन्तव्यम्-मननीयम्, ५. मतः-मता-मतम्, ६. मतवान्-मतवती,

७. मन्यमानः-मन्यमाना-मन्यमानम्, ८. मत्त्वा-प्रमत्य, ९. मन्तुम् ।

मस्ज् - to take dip

१. मज्जति, २. मज्ज्यते, ३. मङ्क्ष्यति,

४. मङ्क्तव्यम्-मज्जनीयम् , ५. मग्नः-मग्ना-मग्नम्, ६. मग्नवान्-मग्नवती,

७. मज्जन्-मज्जन्ती-मज्जती, ८. मङ्क्त्वा-निमज्ज्य, ९. मङ्क्तुम् ।

मन्थ् - to churn

१. मथ्नाति, २. मथ्यते, ३. मन्थिष्यति,

४. मन्थितव्यम्-मन्थनीयम्, ५. मथितः-मथिता-मथितम्, ६. मथितवान्-मथितवती, ७. मथ्नन्-मथ्नती, ८. मथित्वा-मन्थित्वा, प्रमथ्य-प्रमन्थ्य, ९. मन्थितुम् ।

मा - to measure

१. माति, २. मीयते, ३. मास्यति,

४. मातव्यम्-मानीयम्, ५. मितः-मिता-मितम्, ६. मितवान्मितवती,

७. मान्-मान्ती-माती, ८. मित्वा-प्रमाय, ९. मातुम् ।

7. having killed, 8. one's treasury, 9. on hearing.

मुच् - to leave, abandon

१. मुञ्चति, २. मुच्यते, ३. मोक्ष्यति,

४. मोक्तव्यम्-मोचनीयम्, ५. मुक्तः-मुक्ता-मुक्तम्, ६. मुक्तवान्-मुक्तवती, ७. मुञ्चन्-मुञ्चन्ती-मुञ्चती, ८. मुक्त्वा-विमुच्य, ९. मोक्तुम्।

३. प्रहेलिकाः - ८

अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने ।
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः ॥

In this verse apparent meaning is different than the real meaning.

1. **Apparent meaning**- O ! Beautiful ! I have seen something which is strange and lovely. It has 'sho' in the middle, If anybody makes out this, no doubt he is a learned.
2. **Real Meaning**- The thing which I have seen is अपूर्व (Beginning with अ) and कान्त (ending with क) The letter शो is in between them.

(Answer is अशोक. It is the name of a tree)

४. सुभाषितम् - १३

आयुर्वर्षशतं[1] नृणां परिमितं रात्रौ तदर्धं गतम्
तस्यार्धस्य[2] परस्य चार्धमपरं[3] बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते[4]
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ?

---

१. विसर्गसन्धिः (रकारः), २. सवर्णदीर्घसन्धिः, ३. सवर्णदीर्घसन्धिः, ४. विसर्गसन्धिः (रकारः)

पदविभागः

आयुः, वर्षशतम्, नृणाम्, परिमितम्, रात्रौ, तदर्धम्, गतम्, तस्य, अर्धस्य, परस्य, च, अर्धम्, अपरम्, बालत्ववृद्धत्वयोः, शेषम्, व्याधिवियोगदुःखसहितम्, सेवादिभिः, नीयते, जीवे, वारितरङ्गचञ्चलतरे, सौख्यम्, कुतः, प्राणिनाम् ॥

तात्पर्यम्

Men live for a hundred years. Half of it is spent in sleep, half of the remaining is spent in childhood and old age. The remaining twenty five years are spent serving others and suffering due to sickness, sepration from the dear ones etc. when life is as unsteady as the waves in water, where is any happiness for the beings of this world ?

अन्वयार्थः

नृणां वर्षशतम् आयुः परिमितम् । तदर्धं रात्रौ गतम् । परस्य तस्य अर्धस्य अपरम् अर्धं बालत्ववृद्धत्वयोः गतम् । व्याधिवियोगदुःखसहितं शेषं सेवादिभिः नीयते । वारितरङ्गचञ्चलतरे जीवे प्राणिनां सौख्यं कुतः ?

अन्वयः

वर्षशतम् - A span of hundred years, परिमितम् - is fixed आयुः - as the life time, नृणाम् - of men, तदर्धम् - half of it, गतम् - is spent रात्रौ - during night, अपरम् अर्धम् - one half परस्य तस्य अर्धस्य - of the remaining fifty years, बालत्ववृद्धत्वयोः - in childhood and oldage, शेषम् - the remained, व्याधिवियोगदुःखसहितम् - which is full of sickness, separation from the loved ones and misery सेवादिभिः - serving others etc., नीयते - is spent, जीवे - where life, वारितरङ्गचञ्चलतरे - as unsteady,

as waves in water कुतः सौख्यम् - where is any happiness. प्राणिनाम् - for the beings ?

सुभाषितम् - १४

फलमलमशनाय स्वादु पानाय तोयं
क्षितिरपि[1] शयनार्थं वाससे वल्कलं च ।
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणां
अविनयमनुमन्तुं नोत्सहे[2] दुर्जनानाम् ।

पदविभागः

फलम्, अलम्, अशनाय, स्वादु, पानाय, तोयम्, क्षितिः, अपि, शयनार्थम्, वाससे, वल्कलम्, च, नवधनमधुपानभ्रान्तसर्वेन्द्रियाणाम्, अविनयम्, अनुमन्तुम्, न, उत्सहे, दुर्जनानाम् ।

तात्पर्यम्

A Saint speaks- "Fruits are enough to eat, sweet water is enough for a drink, the ground is good enough for a bed and bark dress will do for clothing. But never will we accept a wicked man who has lost control over his senses due to the drink in the form of sudden wealth.

अन्वयार्थः

अशनाय - to eat फलम् - fruit अलम् - is enough पानाय - to drink स्वादु - Sweet तोयम् - Water अलम् - enough शयनार्थम् - to sleep क्षितिः - ground अलम् - is enough वाससे - for clothing वल्कलम् - bark cloth अलम् - is enough (But) न उत्सहे - I do not want अनुमन्तुम् - to

---

१. विसर्गसन्धिः, २. गुणसन्धिः

approve अविनयम् - rude behaviour दुर्जनानाम् - of wicked नव ..... याणाम् - whose sense orgens are confused by drinking the wine called new (recently achieved) wealth.

५. काव्यकथा

तपोभङ्गप्रयत्नः

[a]शरत्कालस्सन्निहितः[1] । भूमिर्धान्यसमृद्ध्या[2] पूर्णा अभवत् । नदीनां सरोवराणाञ्च[3] जलं निर्मलमभवत् । गगनतले पक्षिसमूहो[4] मधुरङ्गानमकरोत्[5]। सुगन्धो[6] मारुतः मन्दं [b]मन्दं प्रावहत् । दिशः प्रसन्नाः ॥

अर्जुनः इन्द्रकीलपर्वतं प्राप्तः । यक्षः उक्तवान्- "अर्जुन ! शस्त्रं धृत्वा [c]तपस्यां कुरु । [7]तपसो मध्ये विघ्ना[8] भवन्त्येव[9] । तथापि[10] तदनन्तरं कल्याणं भविष्यति । अत[11] इन्द्रियचापलं परित्यज । शिवस्तव[12] सन्तापं परिहरतु । इन्द्रो[13] लोकपालाश्च[14] तपस्सिद्धये सहाया[15] भवन्तु ।" एवम् आशीर्वादं कृत्वा यक्षः स्वस्थानं गतः ।

---

१. शरत्कालः + सन्निहितः - विसर्गसन्धिः (स)
२. भूमिः + धान्यसमृद्ध्या - विसर्गसन्धिः (र)
३. सरोवराणां + च - (परसवर्णसन्धिः)
४. पक्षिसमूहः + मधुरम् - विसर्गसन्धिः (उ) + गुणसन्धिः
५. मधुरं + गानम् - (परसवर्णसन्धिः)
६. सुगन्धः + मारुतः - विसर्गसन्धिः (उ) + गुणसन्धिः
७. तपसः + मध्ये - विसर्गसन्धिः (उ) + गुणसन्धिः
८. विघ्नाः + भवन्ति - विसर्गसन्धिः (लोपः)
९. भवन्ति + एव - यण्सन्धिः
१०. तथा + अपि - सवर्णदीर्घसन्धिः
११. अतः + इन्द्रियचापलम् - विसर्गसन्धिः (लोपः)
१२. शिवः + तव - विसर्गसन्धिः (स)
१३. इन्द्रः + लोकपालाः - विसर्गसन्धिः (उ) + गुणसन्धिः
१४. लोकपालाः + च - विसर्गसन्धिः (स)
१५. सहायाः + भवन्तु - विसर्गसन्धिः (लोपः)

---

a. Autumn, b. gently, c. Penance

अर्जुनः इन्द्रकीलपर्वतेऽवसत्[16] । पर्वतसमीपे गङ्गानदी प्रवहति । स[17] प्रदेशोऽतीव[18] रमणीय[19] आसीत् । तथा वृक्षा[20] [d]भ्रमरैरावृताः[21] । पक्षिणो[22] मधुरनादेन [e]कूजन्ति । प्रायस्ते[23] अर्जुनाय जयघोषं [f]कुर्वन्तीव[24]। तत्र [g]कलहंसाः गङ्गाजले तरन्ति । तदपि दृश्यं बहु मनोहरम् । एवं रम्यं दृश्यम् अर्जुनो [25]दृष्टवान् ।

पर्वतस्य परिसरः प्रशान्तः । अर्जुनस्तत्र[26] तपस्यामारब्धवान् । सर्वाणीन्द्रियाणि[27] स्वाधीनानि कृतवान् । कठिनं तप[28] एव आचरितवान् । तथापि[29] तपोऽनुष्ठानेन तेन खेदो[30] नानुभूतः[31] । तपसः प्रभावेण तस्य शरीरमुज्ज्वलमभवत् । शरीरकान्तिः सर्वत्र प्रसृता[h] ।

---

१६. पर्वते + अवसत् - पूर्वरूपसन्धिः
१७. सः + प्रदेशः - विसर्गसन्धिः (लोपः)
१८. प्रदेशः + अतीव - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः
१९. रमणीयः + आसीत् - विसर्गसन्धिः (लोपः)
२०. वृक्षाः + भ्रमरैः - विसर्गसन्धिः (लोपः)
२१. भ्रमरैः + आवृताः - विसर्गसन्धिः (र)
२२. पक्षिणः + मधुरनादेन - विसर्गसन्धिः (उ) + गुणसन्धिः
२३. प्रायः + ते - विसर्गसन्धिः (स)
२४. कुर्वन्ति + इव - सवर्णदीर्घसन्धिः (स)
२५. अर्जुनः + दृष्टवान् - विसर्गसन्धिः (उ) + गुणसन्धिः
२६. अर्जुनः + तत्र - विसर्गसन्धिः (स)
२७. सर्वाणि + इन्द्रियाणि - सवर्णदीर्घसन्धिः
२८. तपः + एव - विसर्गसन्धिः (लोपः)
२९. तथा + अपि - सवर्णदीर्घसन्धिः
३०. खेदः + न - विसर्गसन्धिः (उ) + गुणसन्धिः
३१. न + अनुभूतः - सवर्णदीर्घसन्धिः

---

d. by honey bees, e. Sing (birds) f. Are doing as it were, g. Swans, h. spread

अर्जुनस्य तपः प्रभावयुतम्[i] । तत्र वने क्रूरमृगा[32] अपि हिंसाकार्यं पर्यत्यजन् । वृक्षाः [k]पल्लवैस्समृद्धा[33] अभवन् । आकाशः अपि निर्मलः अभवत् । भूतलमपि [l]धूलिकणरहितञ्जातम्[34] ।

अर्जुनस्य तपोवैभवेन वनचराणां[m] कष्टञ्जातम्[35] । आहारविहारेषु क्लेशोऽनुभूतः[36] । ते सर्वे इन्द्रसमीपं गताः । अर्जुनस्य तपोविचारं तस्मै निवेदितवन्तः । इदं श्रुत्वा इन्द्रो[37] हृष्टः । किन्तु सन्तोषं न प्रकटितवान् । स [38]अर्जुनस्य परीक्षां कर्तुम् अपेक्षितवान् ।

इन्द्रः अर्जुनस्य तपोभङ्गं कर्तुम् अप्सरसां [n]सकाशे उक्तवान्- ''कटाक्षपातैः[o] अर्जुनस्य वशीकरणं कर्तव्यम् । शापभयं मास्तु[p]'' इति । अप्सरसः प्रस्थिताः । ताः [39]विविधैर्भूषणैर्भूषिताः[40] । तपोविघ्नार्थं ताः [41]उच्चैर्वार्तालापं[q] कृतवत्यः । हावभावान् प्रदर्शितवत्यः । किन्तु अर्जुनो[42] न विचलितः । स[43] जितेन्द्रियः । अतस्तासां[44] चेष्टा[45] विफला[46] जाताः। ताः स्वस्थानं प्रतिनिवृत्ताः ।

---

३२. क्रूरमृगाः + अपि - विसर्गसन्धिः (लोपः)
३३. समृद्धाः + अभवन् - विसर्गसन्धिः (लोपः)
३४. रहितं + जातम् - (परसवर्णसन्धिः)
३५. कष्टं + जातम् - (परसवर्णसन्धिः)
३६. क्लेशः + अनुभूतः - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः
३७. इन्द्रः + हृष्टः - विसर्गसन्धिः + गुणसन्धिः
३८. सः + अर्जुनस्य - विसर्गसन्धिः (लोपः)
३९. विविधैः + भूषणैः - विसर्गसन्धिः (र)
४०. भूषणैः + भूषिताः - विसर्गसन्धिः (र)
४१. उच्चैः + वार्तालापम् - विसर्गसन्धिः (र)
४२. अर्जुनः + न - विसर्गसन्धिः (उ) + गुणसन्धिः
४३. सः + जितेन्द्रियः - गुणसन्धिः (लोपः)
४४. अतः + तासाम् - विसर्गसन्धिः (स)
४५. चेष्टाः + विफलाः - विसर्गसन्धिः (लोपः)
४६. विफलाः + जाताः - विसर्गसन्धिः (लोपः)

---

i. Fruitful, j. gave up, k. Tender leaves, l. without dust, m. for tribals, n. Near, o. By the side glances, p. let there not be, q. conversation.

६. अन्वयरचनाक्रमः

After listening to Vidura's advice Dhritarashtra asks-

१७. पापाशङ्की पापमेवानुपश्यन्
पृच्छामि त्वां व्याकुलेनात्मनाहम् ।
कवे तन्मे ब्रूहि तत्त्वं यथावत्
मनीषितं सर्वमजातशत्रोः ॥

पदविभागः

पापाशङ्की, पापम्, एव, अनुपश्यन्, पृच्छामि, त्वाम्, व्याकुलेन, आत्मना, अहम्, कवे, तत्, मे, ब्रूहि, तत्त्वम्, यथावत्, मनीषितम्, सर्वम्, अजातशत्रोः ।

तात्पर्यम्

In anticipation of only evil, I am seeing only evil. As I am in a perturbed state of mind, I am asking you. Tell me correctly what Yudhishtira might be thinking.

अन्वयरचना

पृच्छामि - I ask
कः ? - अहम् - कर्तृपदम्
कीदृशः अहम् ? - पापाशङ्की
पुनः कीदृशः ? अनुपश्यन्
किम् अनुपश्यन् ? - पापम्
कं पृच्छामि ? - त्वाम् - कर्मपदम्
केन पृच्छामि ? - आत्मना - by mind
कीदृशेन आत्मना ? - व्याकुलेन

कवे ! - oh learned one !
ब्रूहि - tell me
कः ? - (त्वम्) - कर्तृपदम्
किं ब्रूहि ? - तत्त्वम्
कथं ब्रूहि ? - यथावत्
पुनः किं ब्रूहि ? - मनीषितम्
कीदृशं मनीषितम् ? - सर्वम्
कस्य मनीषितम् ? - अजातशत्रोः

Write the prose order and word to word meaning of the above verse.

Vidura says to Dhritarashtra-

१८. चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
प्रसादयति लोकं यः तं लोकोऽनुप्रसीदति ॥

पदविभागः

लोकः + अनुप्रसीदति

तात्पर्यम्

If a king pleases his subjects with his vision, words, thoughts and actions his subjects will also please him.

Write the अन्वयरचना of the above verse.

७. सन्धयः

४. विसर्गसन्धिः (सकारनियमः)

Visarga Sandhi (where विसर्ग is replaced by सकार)

A visarga followed by स, त, थ, is replaced by

सकार:; that followed by श, च, छ, is replaced by शकार and that followed by ष, ट, ठ, is replaced by षकार ।

Examples-

कपि: + स: = कपिस्स:

राम: + तत्र = रामस्तत्र

पीत: + शङ्ख: = पीतश्शङ्ख:

शुभ्र: + चन्द्र: = शुभ्रश्चन्द्र:

सेवक: + छत्रम् = सेवकश्छत्रम्

शिव: + षण्मुखम् = शिवष्षण्मुखम्

विमर्शक: + टीकते = विमर्शकष्टीकते

Thus Visarga Sandhi is of four kinds. Note these while reading shlokas in Samskrit.

८. सङ्ग्राह्यविषया:

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्चकं ना स्मरेन्नित्यं महापातकनाशनम् ॥

One who remembers daily five chaste women- Ahalya, Droupadi, Sita, Tara and Mandodari his sins are destroyed.

मत्स्य: कूर्मो वराहश्च नरसिंहोऽथ वामन: ।
रामो रामश्च कृष्णश्च बुद्ध: कल्किर्नमोऽस्तु ते ॥

O Lord ! I salute you who has taken ten incarnations viz. मत्स्य (fish) कूर्म (tortoise) वराह (boar) नरसिंह (a manlion) वामन, श्रीराम, परशुराम, कृष्ण, बुद्ध and कल्कि.



ॐ

संस्कृत भारती

पत्रालयद्वारा संस्कृतम्

Samskrit Through Correspondence

Serial No. [ ]

शिक्षा - ८

अष्टम: पाठ:

प्रश्ना:

I. Translate the following passage into Samskrit-

In a certain village there lived an old lady. She was very proud. She used to get up early in the morning. She had a rooster. It used to call in the morning. The people of the village used to get up on hearing the rooster's call. One day the old lady thought- "everyday my rooster calls and then only the sun rises. To-night I will go away to a city. Tomorrow the sun will not rise in the village and people will suffer."

That night the old lady went away to a city. As always the sun rose in the village. The old lady returned and saw that the sun had risen. The proud old lady felt ashamed.

NOTE
Please write the answers in a separate sheet of paper and send it to us.

शि (इं) - VIII, नवें - ९७, १,०००

यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान् स्वहितान् गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि ।।

The elders desire our welfare. So, the persons who consult the elders and perform any action will never have any difficulty.

मानाद्वा यदि वा लोभात् क्रोधाद्वा यदि वा भयात् ।
यो न्यायमन्यथा ब्रूते स याति नरकं नरः ।।

The person who distorts the truth due to prestige, greed, anger or fear; is certain to go to hell.

यथैकेन न हस्तेन तालिका सम्प्रपद्यते ।
तथोद्यमपरित्यक्तं न फलं कर्मणः स्मृतम् ।।

It is not possible to clap with a single hand. Similarly no action is successful without effort.

सूचना -
एतस्मिन् पुटे स्थिताः श्लोकाः परीक्षार्थं न ।

शि(इं) -viii - नवें - १७, १,०००

PRINTED BOOK

(clause 128 of p.o. Guide, part-1)

सविधे,

Dr. Demian Martins

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

SAMSKRITA BHARATI

'AKSHARAM', 8th Cross. 2nd Phase

Girinagar, Bangalore-560 085